# Shri Mahatripura Sundari Hridayam

# શ્રીમહાત્રિપુરસુન્દરીહૃદયમ્

## Document Information

Text title : Tripurasundari Hridaya Stotram

File name : tripurasundarIhRRidayastotram.itx

Category : devii, devI, dashamahAvidyA, hRidaya

Location : doc_devii

Proofread by : Divya K Suresh

Latest update : May 23, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 23, 2021

*sanskritdocuments.org*

# શ્રીમહાત્રિપુરસુન્દરીહૃદયમ્

વન્દે સિન્દૂરવર્ણાભં વામોરુન્યસ્તવલ્લભમ્ ।
ઇક્ષુવારિધિમધ્યસ્થમિભરાજમુખં મહઃ ॥ ૧॥

ગમ્ભીરલહરીજાલગણ્ડૂષિતદિગન્તરઃ ।
અવ્યાન્મામમૃતામ્ભોધિરનર્ઘમણિસંયુતઃ ॥ ૨॥

મધ્યે તસ્ય મનોહારિ મધુપારવમેદુરમ્ ।
પ્રસૂનવિગલન્માધ્વીપ્રવાહપરિપૂરિતમ્ ॥ ૩॥

કિન્નરીગાનમેદસ્વિ ક્રીડાકન્દરદન્તુરમ્ ।
કાઞ્ચનદ્રુમધૂલીભિઃ કલ્પિતાવાલવદ્દ્રુમમ્ ॥ ૪॥

મુગ્ધકોકિલનિક્કાણમુખરીકૃતદિઙ્મુખમ્ ।
મન્દારતરુસન્તાનમઞ્જરીપુઞ્જપિઞ્જરમ્ ॥ ૫॥

નાસાનાડિન્ધમસ્મેરનમેરુસુમસૌરભમ્ ।
આવૃન્તહસિતામ્ભોજદીવ્યદ્વિભ્રમદીર્ઘિકમ્ ॥ ૬॥

મન્દરક્તશુકીદષ્ટમાતુલુઙ્ગફલાન્વિતમ્ ।
સવિધસ્યન્દમાનાભ્રસરિત્કલ્લોલવેલ્લિતમ્ ॥ ૭॥

પ્રસૂનપાંસુસૌરભ્યપશ્યતોહરમારુતમ્ ।
વકુલપ્રસવાકીર્ણં વન્દે નન્દનકાનનમ્ ॥ ૮॥

તન્મધ્યે નીપકાન્તારં તરણિસ્તમ્ભકારણમ્ ।
મધુપાલિવિમર્દાલિકલક્વાણકરમ્બિતમ્ ॥ ૯॥

કોમલશ્વશનાધૂતકોરકોદ્ગતધૂલિભિઃ ।
સિન્દૂરિતનભોમાર્ગં ચિન્તિતં સિદ્ધવન્દિભિઃ ॥ ૧૦॥

મધ્યે તસ્ય મરુન્માર્ગલમ્બિમાણિક્યતોરણમ્ ।
શાણોલ્લિખિતવૈદૂર્યક્લૃપ્તસાલસમાકુલમ્ ॥ ૧૧॥

માણિક્યસ્તમ્ભપટલીમયૂખવ્યાપ્તદિક્તટમ્ ।
પઞ્ચવિંશતિસાલાઢ્યાં નમામિ નગરોત્તમમ્ ॥ ૧૨॥

તત્ર ચિન્તામણિગૃહં તડિત્કોટિસમુજ્જ્વલમ્ ।
નીલોત્પલસમાકીર્ણનિર્યૂહશતસઙ્કુલમ્ ॥ ૧૩॥

સોમકાન્તમણિક્લૃપ્તસોપાનોદ્ભાસિવેદિકમ્ ।
ચન્દ્રશાલાચરત્કેતુસમાલીઢનભોન્તરમ્ ॥ ૧૪॥

ગારુત્મતમણીક્લૃપ્તમણ્ડપવ્યૂહમણ્ડિતમ્ ।
નિત્યસેવાપરામર્ત્યનિબિડદ્વારશોભિતમ્ ॥ ૧૫॥

અધિષ્ઠિતં દ્વારપાલૈરસિતોમરપાણિભિઃ ।
નમામિ નાકનારીણાં સાન્દ્રસઙ્ગીતમેદુરમ્ ॥ ૧૬॥

તન્મધ્યે તરુણાર્કાભં તપ્તકાઞ્ચનનિર્મિતમ્ ।
શક્રાદિમદ્વારપાલૈસ્સન્તતં પરિવેષ્ટિતમ્ ॥ ૧૭॥

ચતુષ્ષષ્ટિમહાવિદ્યાકલાભિરભિસંવૃતમ્ ।
રક્ષિતં યોગિનીવૃન્દૈ રત્નસિંહાસનં ભજે ॥ ૧૮॥

મધ્યે તસ્ય મરુત્સેવ્યં ચતુર્દ્વારસમુજ્જ્વલમ્ ।
ચતુરસ્રત્રિરેખાઢ્યાં ચારુત્રિવલયાન્વિતમ્ ॥ ૧૯॥

કલાદલસમાયુક્તં કનદષ્ટદલાન્વિતમ્ ।
ચતુર્દશારસહિતં દશારદ્વિતયાન્વિતમ્ ॥ ૨૦॥

અષ્ટકોણયુતં દિવ્યમગ્રિકોણવિરાજિતમ્ ।
યોગિભિઃ પૂજિતં યોગિયોગિનીગણસેવિતમ્ ॥ ૨૧॥

સર્વદુઃખપ્રશમનં સર્વવ્યાધિવિનાશનમ્ ।
વિષજ્વરહરં પુણ્યં વિવિધાપદ્વિદારણમ્ ॥ ૨૨॥

સર્વદારિદ્ર્યશમનં સર્વભૂપાલમોહનમ્ ।
આશાભિપૂરકં દિવ્યમર્ચકાનામહર્નિશમ્ ॥ ૨૩॥

અષ્ટાદશસુમર્માઢ્યં ચતુર્વિંશતિસન્ધિનમ્ ।
શ્રીમદ્બિન્દુગૃહોપેતં શ્રીચક્રં પ્રણમામ્યહમ્ ॥ ૨૪॥

તત્રૈવ બૈન્દવસ્થાને તરુણાદિત્યસન્નિભમ્ ।
પાશાઙ્કુશધનુર્બાણપરિષ્કૃતકરામ્બુજમ્ ॥ ૨૫॥

પૂર્ણેન્દુબિમ્બવદનં ફુલ્લપઙ્કજલોચનમ્ ।
કુસુમાયુધશ ృ ઙ્ગારકોદણ્ડકુટિલભ્રુવમ્ ॥ ૨૬॥

ચારુચન્દ્રકલોપેતં ચન્દનાગુરુરૂષિતમ્ ।
મન્દસ્મિતમધૂકાલિકિઞ્જલ્કિતમુખામ્બુજમ્ ॥ ૨૭॥

પાટીરતિલકોદ્ભાસિફાલસ્થલમનોહરમ્ ।
અનેકકોટિકન્દર્પલાવણ્યમરુણાધરમ્ ॥ ૨૮॥

તપનીયાંશુકધરં તારુણ્યશ્રીનિષેવિતમ્ ।
કામેશ્વરમહં વન્દે કામિતાર્થપ્રદં નૃણામ્ ॥ ૨૯॥

તસ્યાઙ્કમધ્યમાસીનાં તપ્તહાટકસન્નિભામ્ ।
માણિક્યમુકુટચ્છાયામણ્ડલારુણદિઙ્મુખામ્ ॥ ૩૦॥

કલવેણીકનત્ફુલ્લકહ્લારકુસુમોજ્જ્વલામ્ ।
ઉડુરાજકૃતોત્તંસામુત્પલશ્યામલાલકામ્ ॥ ૩૧॥

ચતુર્થીચન્દ્રસચ્છાત્રફાલરેખાપરિષ્કૃતામ્ ।
કસ્તૂરીતિલકારૂઢકમનીયલલન્તિકામ્ ॥ ૩૨॥

ભ્રુલતાશ્રીપરાભૂતપુષ્પાયુધશરાસનામ્ ।
નાલીકદલદાયાદનયનત્રયશોભિતામ્ ॥ ૩૩॥

કરુણારસમ્પૂર્ણકટાક્ષહસિતોજ્જ્વલામ્ ।
ભવ્યમુક્તામણિચારુનાસામૌક્તિકવેષ્ટિતામ્ ॥ ૩૪॥

કપોલયુગલીનૃત્યકર્ણતાટઙ્કશોભિતામ્ ।
માણિક્યવાલીયુગલીમયૂખારુણદિઙ્મુખામ્ ॥ ૩૫॥

પરિપક્વસુબિમ્બાભાપાટલાધરપલ્લવામ્ ।
મઞ્જુલાધરપર્વસ્થમન્દસ્મિતમનોહરામ્ ॥ ૩૬॥

દ્વિખણ્ડદ્વિજરાજાભગણ્ડદ્વિતયમણ્ડિતામ્ ।
દરફુલ્લલસદ્ગણ્ડધવલાપૂરિતાનનામ્ ॥ ૩૭॥

પચેલિમેન્દુસુષમાપાટચ્ચરમુખપ્રભામ્ ।
કન્ધરાકાન્તિહસિતકમ્બુબિમ્બોકડમ્બરામ્ ॥ ૩૮॥

કસ્તૂરીકર્દમાશ્યામકન્ધરામૂલકન્દરામ્ ।

વામાંસશિખરોપાન્તવ્યાલમ્બિઘનવેણિકામ્ ॥ ૩૯॥

મૃણાલકાણ્ડદાયાદમૃદુબાહુચતુષ્ટયામ્ ।
મણિકેયૂરયુગલીમયૂખારુણવિગ્રહામ્ ॥ ૪૦॥

કરમૂલલસદ્રત્નકઙ્કણક્વાણપેશલામ્ ।
કરકાન્તિસમાધૂતકલ્પાનોકહપલ્લવામ્ ॥ ૪૧॥

પદ્મરાગોર્મિકાશ્રેણિભાસુરાઙ્ગુલિપાલિકામ્ ।
પુણ્ડ્રકોદણ્ડપુષ્પાસ્ત્રપાશાઙ્કુશલસત્કરામ્ ॥ ૪૨॥

તપ્તકાઞ્ચનકુમ્ભાભસ્તનમણ્ડલમણ્ડિતામ્ ।
ઘનસ્તનતટીક્લૃપ્તકાશ્મીરક્ષોદપાટલામ્ ॥ ૪૩॥

કૂલઙ્કુષકુચસ્ફારતારહારવિરાજિતામ્ ।
ચારુકૌસુમ્ભકૂર્પાસચ્છન્નવક્ષોજમણ્ડલામ્ ॥ ૪૪॥

નવનીલઘનશ્યામરોમરાજિવિરાજિતામ્ ।
લાવણ્યસાગરાવર્તનિભનાભિવિભૂષિતામ્ ॥ ૪૫॥

ડિમ્ભમુષ્ટિતલગ્રાહ્યમધ્યયષ્ટિમનોહરામ્ ।
નિતમ્બમણ્ડલાભોગનિક્વણન્મણિમેખલામ્ ॥ ૪૬॥

સન્ધ્યારુણક્ષૌમપટીસઞ્છન્નજઘનસ્થલામ્ ।
ઘનોરુકાન્તિહસિતકદલીકાણ્ડવિભ્રમામ્ ॥ ૪૭॥

જાનુસમ્પુટકદ્વન્દ્વજિતમાણિક્યદર્પણામ્ ।
જઙ્ઘાયુગલસૌન્દર્યવિજિતાનઙ્ગકાહલામ્ ॥ ૪૮॥

પ્રપદચ્છાયસન્તાનજિતપ્રાચીનકચ્છપામ્ ।
નીરજાસનકોટીરનિઘૃષ્ટચરણામ્બુજામ્ ॥ ૪૯॥

પાદશોભાપરાભૂતપાકારિતરુપલ્લવામ્ ।
ચરણામ્ભોજશિઞ્જનમણિમઞ્જીરમઞ્જુલામ્ ॥ ૫૦॥

વિબુધેન્દ્રવધૂત્સઙ્ગવિન્યસ્તપદપલ્લવામ્ ।
પાર્શ્વસ્થભારતીલક્ષ્મીપાણિચામરવીજિતામ્ ॥ ૫૧॥

પુરતો નાકનારીણાં પશ્યન્તીં નૃત્તમદ્ભુતમ્ ।
ભ્રૂલતાઞ્ચલસમ્ભૂતપુષ્પાયુધપરમ્પરામ્ ॥ ૫૨॥

પ્રત્યગ્રયૌવનોન્મત્તપરિફુલ્લવિલોચનામ્ ।
તામ્રોષ્ઠીં તરલાપાઙ્ગીં સુનાસાં સુન્દરસ્મિતામ્ ॥ ૫૩॥

ચતુરર્થધ્રુવોદારાં ચામ્પેયોદ્ગન્ધિકુન્તલામ્ ।
મધુસ્નપિતમૃદ્વીકમધુરાલાપપેશલામ્ ॥ ૫૪॥

શિવાં ષોડશવાર્ષીકાં શિવાઙ્કતલવાસિનીમ્ ।
ચિન્મયીં હૃદયમ્ભોજે ચિન્તયેજ્જાપકોત્તમઃ ॥ ૫૫॥

ફલશ્રુતિઃ ।
ઇતિ ત્રિપુરસુન્દર્યા હૃદયં સર્વકામદમ્ ।
સર્વદારિદ્ર્યશમનં સર્વસમ્પત્પ્રદં નૃણામ્ ॥ ૫૬॥

તાપજ્વરાર્તિશમનં તરુણીજનમોહનમ્ ।
મહાવિષહરં પુણ્યં માઙ્ગલ્યકરમદ્ભુતમ્ ॥ ૫૭॥

અપમૃત્યુહરં દિવ્યમાયુષ્યશ્રીકરં પરમ્ ।
અપવર્ગૈકનિલયમવનીપાલવશ્યદમ્ ॥ ૫૮॥

પઠતિ ધ્યાનરત્નં યઃ પ્રાતસ્સાયમતન્દ્રિતઃ ।
ન વિષાદૈસ્સ ચ પુમાન્ પ્રાપ્નોતિ ભુવનત્રયમ્ ॥ ૫૯॥

ઇતિ શ્રીમહાત્રિપુરસુન્દરીહૃદયં સમ્પૂર્ણમ્ ।
શ્રીપરામ્બા સુપ્રસન્ના વરદાઽસ્તુ ॥

Proofread by Divya K Suresh

*Shri Mahatripura Sundari Hridayam*
pdf was typeset on May 23, 2021

Please send corrections to *sanskrit@cheerful.com*